International Journal of Sanskrit Research 2020; 6(6): 159-162

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(6): 159-162
© 2020 IJSR
www.anantaajournal.com
Received: 05-08-2020
Accepted: 11-10-2020

**जयश्री दे**
गवेषिका, संस्कृतविभागस्य,
विश्वभारतीविश्वविद्यालयस्य,
पश्चिम बंगाल, भारत

**Corresponding Author:**
**जयश्री दे**
गवेषिका, संस्कृतविभागस्य,
विश्वभारतीविश्वविद्यालयस्य,
पश्चिम बंगाल, भारत

# वर्तमानसामाजिकावक्षेषु प्राचीनभारतीयसमाजव्यवस्थायाः गुरुत्वम् – एका विश्लेषणात्मकसमीक्षा

**जयश्री दे**

**सारसंक्षेपः** – सम्–पूर्वात् अज्–धातोः घञ्–प्रत्ययेन 'समाज'शब्दस्य निष्पत्तिर्भवति । अस्माकं समाजे सामाजिकावक्षयाणां चित्राणि सर्वत्रैव परिदृश्यन्ते । किन्तु अस्माकं प्राचीनभारते या उत्तमसमाजव्यवस्था प्रचलितासीत् तदनुसारेण यदि वयं जीवनयापनं कुर्मः तर्हि उत्तमं भविष्यति । अनेन कारणेन प्राचीनभारतस्य समाजव्यवस्थामवलम्ब्य अस्माकमालोचना कर्तव्या । प्राचीनकालादारभ्यः वेदादिशास्त्रेषु, मनुप्रभृतिधर्मशास्त्रेषु, पुराणेषु, रामायणे, महाभारते, धुपदीसंस्कृतसाहित्ये च समाजस्य उन्नतिविषये बहुचिन्तनं परिदृश्यते । उपनिषदि अपि दृश्यते – 'तेन त्यक्तेन भूञ्जीथाः।' सर्वेषां शान्तिलाभार्थं मङ्गलार्थञ्च भारतीयशास्त्रकाराः सर्वदा उपदिशन्ति । राजा–प्रजा, धनी–दरिद्रः, पण्डितः–मूर्खः, उच्चवर्णः–निम्नवर्णः इत्यादि बहुवैचित्रं परिदृश्यते । पाश्चात्यदार्शनिकाः समाजसंस्कारार्थं चेष्टां कृतवन्तः, तदर्थं प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं व्यासदेवः, मनुः, कौटिल्यः, विवेकानन्दः, वङ्किमचन्द्रः, रवीन्द्रनाथादयो महामनिषिणः चेष्टां कृतवन्तः । अहमपि अस्मिन् समाजव्यवस्थायाः किञ्चिद् चित्रमुल्लिख्यामि ।

**सूचकशब्दाः** – प्राचीनभारतीयसमाजः, महाभारतम्, रामायणम्, मनुसंहिता, श्रीमद्भगवद्गीता, पुराणम्, व्यसनम्, सामाजिकावस्था ।

## प्रस्तावना

वर्तमानसमये अस्माकं समाजे सामाजिकावक्षयाणां चित्राणि सर्वत्रैव परिदृश्यन्ते । किन्तु अस्माकं प्राचीनभारतवर्षस्य या समाजव्यवस्था तस्मिन् समये प्रचलितासीत् तत् तु अतीवोन्नतासीत् । अस्मिनवस्थायां प्राचीनभारतीयसमाजव्यवस्थामनुकरणेन वयं सुष्ठसमाजं लब्धुं शक्नुमः । सम्–पूर्वात् अज्–धातोः घञ्–प्रत्ययेन 'समाज'शब्दस्य निष्पत्तिर्भवति । श्रीमद्भागवतपुराणस्य दशमस्कन्धस्य चतुश्चत्वारिंशोऽध्याये समाजविषये उक्तम्—

"धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ।
यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥"[1]

वयं सर्वे सामाजिकः जीवः । वर्तमानसमये समाजतन्त्रं खलु राजनैतिकमतवादविशेषः । राष्ट्रस्य कृषिव्यवस्थायाः, शिल्पस्य, वाणिज्यस्य, प्राकृतिकसम्पदस्य च कर्ता व्यक्तिविशेषः भवितुं नार्हति । तत्र कर्तृत्वविषये सर्वेषामधिकारः वर्तते, तदेव समाजतन्त्रशब्देन व्यपदिष्यते ।

सर्वेषां समानः अधिकारो यस्यां राष्ट्रव्यवस्थायां वर्तते तत्र गणतन्त्रस्य पूर्णप्रयोगो भवति । प्राचीनकालादारभ्यः वेदादिशास्त्रेषु, मनुप्रभृतिधर्मशास्त्रेषु, पुराणेषु, रामायणे, महाभारते, ध्रुपदीसंस्कृतसाहित्ये च समाजस्य उन्नतिविषये बहुचिन्तनं परिदृश्यते । उपनिषदि अपि दृश्यते –'तेन त्यक्तेन भूञ्जीथाः।' सर्वेषां शान्तिलाभार्थं मङ्गलार्थञ्च भारतीयशास्त्रकाराः सर्वदा उपदिशन्ति । वर्णाश्रमधर्मः भारतीयसमाजस्य भित्तिरूपेण वर्तते । वैदिकसमये चत्वारो वर्णाः आसन्—ब्राह्मणः, क्षत्रियः, वैश्यः शूद्रश्च । तेषु ब्राह्मणस्य मर्यादा अधिकरूपेणासीत् । अर्थाद् आदौ ब्राह्मणस्य शासनमासीत्, तदनन्तरं क्षत्रियस्य, ततः वैश्यस्य । आधुनिके समये ईदृशी व्यवस्था लुप्तप्राया । समाजे सर्वदा बहुवैचित्र्यं दृश्यते । राजा–प्रजा, धनी–दरिद्रः, पण्डितः–मूर्खः, नारी–पुरुषः, उच्चवर्णः–निम्नवर्णः इत्यादि बहुवैचित्रं परिदृश्यते । पाश्चात्त्यदार्शनिकाः समाजसंस्कारार्थं चेष्टां कृतवन्तः, तद्वत् भारतवर्षस्य प्राचीनकालादारभ्यः वर्तमानकालपर्यन्तं मनुः, कौटिल्यः, विवेकानन्दः, वङ्किमचन्द्रः, रवीन्द्रनाथादयो महामनिषिणः चेष्टां कृतवन्तः । सर्व एव मानवीयाः सम्बन्धाः संस्थाश्च 'समाज'–इत्यनेन नामधेयेन व्यवह्रियन्ते । जीवनस्य कृते यदा धनार्जनमपेक्षितं भवति, तदा प्रतिपदं तेन परेषां सहायतामपेक्ष्यते । तदेवं पारस्परिकी सहायता मानवजीवनस्य अस्ति महती विशिष्टता ।

प्राचीनभारते राजधर्मविषये विस्तृतरूपेणालोचनं दृश्यते । राजा, अमात्यः, सुहृत्, कोषः, राज्यम्, दुर्गः सैन्यश्च राजत्वस्य सप्तः अङ्गानि भवन्ति । यदि कोऽपि एतेषां एकस्यापि विरुद्धाचरणं करोति स दण्डार्हो भवति । गुरुर्वा मित्रं वा यो कोऽपि एतेषां विरुद्धाचरणं कुर्वन्ति राजा अवश्यमेव त्वं दण्डप्रदानं करोति । अतएव मनुना उक्तम्—

"दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥"[२]

प्रजानां भरणपोषणविषये शान्तिपर्वणि उच्यते—येषां भरणार्थं पोषणार्थञ्च अर्थादिकं न वर्तते, तान् राजा विभर्त्ति पोषयति च । ये भरणपोषणविषये समर्थाः भवन्ति, तेषामपि राजा सुचारुरूपेण पर्यवेक्षणं करोति । सर्वजनान् प्रति राज्ञो व्यवहारोऽपि सुमधुरं भवति । तथाचोक्तं महाभारते —

"अभृतानां भवेद्भर्त्ता भृतानामन्ववेक्षकः ।
नृपतिः सुमुखश्च स्यात् स्मितपूर्वाभिभाषिता ॥"[३]

राजा कदापि सज्जनानां धनं न गृह्णाति । बलपूर्वकादपि असज्जनानां धनमपहरति, साधुजनेभ्यश्च धनं यच्छति । सन्देहपरायणम्, कपटस्वभावम्, अन्यायधनापहारिणं राजानं स्वात्मीयजनाः विनश्यन्ति । अन्यत्र शास्त्रे दृश्यते—'संशयात्मा विनश्यती'ति । सर्वे जनाः अकोपणस्वभावम्, व्यसनविहीनम्, कोमलदण्डकारिणम्, जितेन्द्रियं राजानं हिमालयपर्वतवत् विश्वसन्ति । व्यसनशब्दस्य निन्दा बहुषु शास्त्रेषु परिदृश्यते । मनुसंहितायां कामजक्रोधजभेदेन द्विविधं व्यसनं कथितम् ।[४] अपि च उत्तमनृपविषये महाभारतकारेण शान्तिपर्वणि उक्तम्—यस्य राज्ञः आरब्धकर्माणि सुपर्य्यवसितानि भवन्ति स राजा राजसु उत्तमो भवति । तत्रास्ति अरक्षितारं राजानं अप्रियवादिनीं भार्य्यां ग्रामकामं गोपालं वनवासार्थिनापितञ्च राजा सर्वदा परित्यजेत् –

"अरक्षितारं राजानं भार्य्यां चाप्रियवादिनीम् ।
ग्रामकामञ्च गोपालं वनकामञ्च नापितम् ॥"[५]

राजा सर्वदा उद्यमी भवेत् इति महाभारते परिदृश्यते । अर्थात् उद्यमस्य प्रशंसा महाभारतकारेण यथार्थरूपेण क्रियते । उद्यमहीनो नृपतिः बुद्धिमान् सन्नपि विषहीनसर्पवत् सर्वदैव शत्रुणा अभिभूतो भवति । बलवान् राजा दुर्बलं शत्रुमपि न अवजानाति । यतः स्वल्पाग्निरपि दग्धुं शक्नोति, अपि च स्वल्पविषोऽपि प्राणान् विनश्यति । तस्मात् महाभारतकालादारभ्याद्यावधि अस्माकं समाजे ब्राह्मण–क्षत्रियाभ्यां सदैव परस्परं मिलिताभ्यां भवितव्यमित्युक्तमस्ति, यतो हि तयोर्मेलनेनैव तयोर्महती प्रतिष्ठा अर्जिता भवति ।

न केवलम् अस्माकं समाजे अपि तु महाभारतकालादारभ्य इदं प्रचलितं वर्तते यत्—कामक्रोधाभ्यां वशीभूतानाम् अर्थलाभस्य प्रयत्नो मृषा । यतो हि मनुसंहितायां कामक्रोधौ व्यसनेऽन्तर्गतौ । कामजक्रोधजव्यसनानि अत्यन्तम् अनिष्टकराणि । तस्मादिदं व्यसनमाश्रित्य कदापि धनोपार्जनं न कार्यम् । अस्माकं समाजे ये यथा वर्तन्ते तैः सह तथाचरितव्यमिति उक्तमस्ति । अयमेव विषयो महाभारतस्य षडधिकशततमाध्यायस्यान्तिमे परिलक्ष्यते । तत्र हि—यो येन सह यथा व्यवहरति स तस्मात्तथैव व्यवहारो लभते, तदेव च न्याय्यमित्यप्युच्यते । अतः कपटं दमयितुं कपटव्यवहारः कर्तव्यः । अस्माकं समाजे धर्मानुसारेण मानवेन कर्मकार्यमित्युक्तमस्ति । अन्यथा अधर्मं आपद्यते, तत् मनुसंहितायां स्पष्टमस्ति । अतः सर्वैः सदा धर्मस्थितैः भवितव्यम्, अस्मिन् प्रसङ्गे महाभारते पश्यामः —

"ये वदन्तीह सत्यानि प्राणत्यागेऽप्युपस्थिते ।
प्रमाणभूता भूतानां दुर्गाण्यतितरन्ति ते ॥"[६]

किन्तु अस्माकं समाजे सुष्ठजीवनधारणाय किं किं करणीयम्, किं किं ग्रहणीयमिति विषयेऽपि सविस्तरं

वर्णितमस्ति । यथा—मनुष्यार्जितधनरक्षणं सदा सत्कर्मणे भवेत्, वेदाध्ययनमकुर्वाणा ब्राह्मणा वेदाध्ययनं कुर्युः । किञ्च आबाल्यात् सश्रद्धं विद्याभ्यासो वेदविहितव्रतानुष्ठानं च कार्यम्, तेन रजस्तमसी दूरीभूते भवतः । वस्तुतो लोभस्त्याज्योऽस्ति, यतो हि अयमेव समाजं नाशयति । लोभः क्रियते चेद् मनसि लोभोदयो भवेत् । ततः समाजस्याधोगतिर्भवति । अतएव मनुरुक्तवान्—'लोभ एव सर्वव्यसनमूलम्' । किञ्च सर्वान् प्रति सम्मानप्रदर्शनमपि समाजविकाशस्य लक्षणमेकं यत् महाभारतकालादद्यापि प्रवहति ।

ये जनाः स्वकीयक्रोधस्य निराकरणं कर्तुं न शक्नुवन्ति ते अपरजनानां क्रोधस्यापि निराकरणं कर्तुं न शक्नुवन्ति । एतत् तु महाभारते वर्णितम् ।[७]

प्राचीनकाले समाजस्य सौन्दर्यरूपायणविषयकमालोचनं परिलक्ष्यते । माल्यकारवत् वृक्षाणां क्षतिसाधनं न कृत्वा पुष्पाणां चयनमस्माभिः करणीयम् । अर्थात् पुष्पाणां चयनं करिष्यामः किन्तु वृक्षस्य पत्रशाखादीनां नाशं न करिष्यामः, एतत् तु शान्तिपर्वणि परिदृश्यते । लोभस्य क्रोधस्य च वर्जनविषये महाभारतकारेण उक्तम्—लोभेन क्रोधेन च समाजस्य नाशो भवति । एको जनः वृतः सन् अपरस्य क्रोधोजायते । एवं प्रकारेण अस्य क्रोधस्य समाजे विस्तारो भवति । ततः समाजस्य लोकक्षयो भविष्यति । सैन्यजनानां यथासमयं भोजनं वेतनादिकं च प्रदातव्यम् अन्यथा ते विच्छिन्नाः भविष्यन्ति । विभेदवशात् गणतन्त्रस्य नाशो भविश्यति । इदमेव समाजस्य साधु निदर्शनम् ।

अपि च मिथ्यादोषयुक्तेभ्यः कलङ्कितेभ्यः पुरुषेभ्यः राजा कदापि शास्तिं प्रयच्छति । अपि च दृश्यते यत् निष्कलङ्कपुरुषान् अपि दण्डं विदधाति । अर्थात् मनुष्याणां प्ररोचनावशाद् अपि प्रकृतापराधकारिणां दण्डं न विदधाति । पुनः अस्माकं समाजे बहवः असाधुजनाः साधुवत् आचरन्ति, पुनः साधुजनाः अपि साधारणमनुष्यवत् तिष्ठन्ति, अतएव दण्डप्रयोगकाले कः प्रकृतः साधुः को वा असाधुः इति राज्ञो विचारः करणीयः । एतत् विषये मनुसंहितायामपि अस्ति —

"समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥"[८]

अर्थात् यदि जिज्ञासा न वर्तते तर्हि स्वकीयपाण्डित्यज्ञापनाय उत्तरं न दातव्यम् । यथार्थज्ञानिपुरुषः सर्वत्र पाण्डित्यं न प्रदर्शयति । चातुर्यवशाद् ये चतुराः जनाः उच्चपदं कांक्षन्ति तेभ्यः राजा सर्वदा दूरं तिष्ठेत् । अर्थात् तेभ्यः राजा उच्चपदं न प्रदास्यति । एते निर्देशाः राज्ञः पालनीयाः । एतेन समाजस्य उन्नतिसाधनं भविष्यति । भृत्यजनान् प्रति राज्ञः आचरणं सुष्ठु भवेत् । अतएव राजा सर्वदा भृत्यजनप्रियो भवेत् । राजा सर्वदा स्वधर्ममनुसरति । अतएव तत्र पिता, माता, भ्राता, भार्य्या पुरोहितश्च दण्डनीयाः भवन्ति । तथाचोक्तं –

"माता पिता च भ्राता च भार्य्या चैव पुरोहितः ।
नादण्ड्यो विद्यते राज्ञो यः स्वधर्म्मेण तिष्ठति ॥"[९]

गुणिजनेभ्यो यथोपयुक्तपदं प्रदातव्यम् । राज्ञः समीपे धनधान्यादीनां प्राचुर्यं स्यात् । येन प्रजानां भोजनादिविषये संरक्षणं भविष्यति । प्राचीनकाले महाभारते अपि राज्ञः कर्तव्यविषयकमालोचनं परिदृश्यते । तथा चोक्तम् – "रक्षणं सर्वस्थाणां इति क्षात्रं परं व्रतम् ।"

धर्मस्य फलं तावत् फलकामना, श्रीमद्भगवद्गीतायामपि निष्कामकर्मविषये उपदिशति—

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥"[१०]

धर्माचरणेन धनप्राप्तिविषये सर्वेषां चेष्टा करणीया । किन्तु अधर्माचरणेन धनाकाङ्क्षा कदापि न करणीया । अधर्मेण धनाकाङ्क्षायां अस्माकं समाजतन्त्रस्य रक्षणं न सम्भवति । रामायणेऽपि दृश्यते अधर्मात् रावणस्य राज्यनाशस्य काहिनी। अस्मिन् जगति अस्मिन् जन्मनि मनुष्याणां कोऽपि यदि पापस्य फलं न प्राप्नोति तर्हि तस्य वंशधररूपेण ये तावत् तिष्ठन्ति ते फलभोगिनः भविष्यन्ति । उत्तराधिकारिरूपेण मनुष्याः यथा धनादिकं प्राप्नुवन्ति तथैव उत्तराधिकारिरूपेण पापस्य फलमपि ते अवश्यं प्राप्नुवन्ति । अतएव अनेन इदं प्रतिपादितं यत् वयं कदापि पापकर्माणि न करिष्यामः । आधुनिकविश्वस्मिन् गणतन्त्रविषये मौलिकं चिन्तनं यद् वर्तते तस्मिन् विषये प्राचीने काले श्रीमद्भागवतपुराणे साधु वर्णितम् ।

एवं रूपेण वयं यदि समाजजीवनं यापयामः तर्हि कोऽपि कस्यापि अर्थग्रासं कर्तुं न शक्नोति । अन्यायरूपेण स्वकीयसम्पद्वृद्धिविषये कस्यापि चेष्टा न वर्तते । अर्थादपरजनानां सम्पदोऽन्यायरूपेण ग्रासयितुं कोऽपि न चेष्टिष्यते । अतः सर्वे सुखेन स्थास्यन्ति । अर्थाद् धनग्रासविषये चिन्ता न करणीयम् । समाजस्य सर्वजनान् प्रति सम्मानप्रदर्शनं करणीयम्, तर्हि वर्तमानसमये समाजस्य मानं रक्षितं भविष्यति, एतेन वयमुन्नतसमाजं प्राप्तुं शक्नुमः ।

**संकेतसूची –**

१. महा. – महाभारतम्
२. मनु. – मनुसंहिता

३. शान्ति. – शान्तिपर्वम्
४. रामा. – रामायणम्
५. गीता. – श्रीमद्भगवद्गीता

**तथ्यसूत्राणि –**

१. श्रीमद्भागवतपुराणस्य दशमस्कन्धस्य चतुश्चत्वारिंशोऽध्यास्य नवम–कारिका।
२. मनु. – ७/१८
३. महा., शान्ति. – ५६/१९
४. मनु. – ७/४७–४८
५. महा. – १२/५६/४५
६. तत्रैव १२/१०७/११
७. तत्रैव १२/१०७/२१
८. मनु. – ७/१९
९. महा., शान्ति. – ११८/६०
१०. गीता. – २/४७

**ग्रन्थपञ्जी –**


१. कृष्णद्वैपायनवेदव्यासः। महाभारतम्। अनु. हरिदससिद्धान्तवागीशभट्टाचार्य्यः। कलिकाता : विश्ववाणी प्रकाशणी, १४०० वङ्गाब्दः।
२. वन्द्योपाध्यायः, धीरेन्द्रनाथः। संस्कृतवाङ्मयस्य इतिहासः। कलकाता : संस्कृत पुस्तक भाण्डार, २०१४ (प्रथमसंस्करणम्)।
३. श्रीधरस्वामिः। श्रीमद्भगवद्गीता। अनु. स्वामी भावघनानन्दः। कलकाता : उद्बोधन कार्यालय, २००३।
४. श्रीमद्भागवतम् । सम्पा. धनञ्जयदासः नृसिंहदासश्च। कलिकाता : चक्रवर्त्ती, चाटार्ज्जि एण्ड कों लिमिटेड्, १३४४ वङ्गाब्दः।
५. मनुसंहिता। सम्पा. पञ्चाननतर्करत्नः। कलिकाता : संस्कृत पुस्तक भाण्डार, १९९३।
६. वाल्मीकिः। रामायणम्। सम्पा. पञ्चाननः तर्करत्नः। कलिकाता : वेणीमाधव शील’स लाइव्रेरी, २०१४ (पुनर्मुद्रणम्), २००० (प्रथमप्रकाशितम्)।